सिद्धत्वे ज्ञानस्यापि ह्रत्तिर्न स्यात् । तथा चैव प्रमाणेनैवार्थोऽप्रमाणकृतातिशयाभावात् । अप्रमसिद्धस्य प्रमा

नेधा

णविषय[illegible]त्वेविँता।तथाचप्रमाणप्रवृत्तेःपूर्वमेवाज्ञाततत्त्वेनसाक्षिणासाधितमेवप्रमेयंप्रामाण्यंविषयीकरोती
तियुक्तंअतोनात्रविप्रतिपत्तिः।तथाचपरमेश्वरःप्रमाणमप्रमाणस्वाप्रमाणांतथैववाकुर्वंस्येवंप्रमामत्रतद्दसं
भावानाकुलः।नन्वपदयोरेकार्थत्वानेकार्थत्वविकल्पः।एकार्थत्वेपिवाक्यप्रमाणोजन्यस्यैवज्ञानस्यभेदभ्रमनिव
र्तकत्वात्नन्वेकपदत्वेपर्थंतेनविनाविरोधाभावेनलक्षणयाखंडवाक्यार्थस्यप्रतिपादयितुमशक्यत्वात्पद
मात्रस्याप्रमाणत्वाच्चेन्नैवप्राधान्येनाकपेलक्षणाउपपत्तिः।इतरांतुपपदजेनार्थप्रतिपादकत्वमेवहिप्राधान्येननाम
तत्रलक्षणयामुख्ययावेत्यन्यदेतत्।नचान्यायविरोधःयत्रप्रतिपाद्यस्यार्थस्यशब्दशक्तिगोचरत्वंतत्रान्यायावता
५ राः॥ननुकर्तृत्वनोक्तवस्तुविवादः।विद्याद्यनेकसंसारधर्मस्यो।निष्कृष्टस्यप्रत्यगात्मनोःवस्तुत्रयात्तुगम
स्यशुद्धस्यचिद्देशस्यपरमात्मनाजगत्कर्तृत्वादिस्यो।निष्कृष्टेनाकाशादिस्थित्तुस्पष्टेतेनशुद्धेनपरिपूर्णमविद्या
नंदस्वभावेनाभेदोलक्षणयावोध्यतइतिप्रतिपादितंतथाचभेदोननिराकृतःस्यादनात्मभेदस्यतत्त्वस्वच्छत्वात्नवा

सिद्धा त्मपरमात्मनोर्भेदग्राहकप्रमाणाबदनात्मभेदग्राहकस्यापि प्रत्यक्षादेरप्रामाण्यप्रसंगे इति सांप्रतं दृष्टांतासिद्धेः
नहि आत्मपरमात्मनोर्भेदग्राहकं प्रमाणमस्ति तयोः स्वयंप्रकाशत्वेन मानाविषयत्वात् विशिष्टविषयस्य मानस्य
२५ विशेषणभेदगोचरत्वेनान्यथासिद्धस्यात्मपरमात्मभेदासाधकत्वात् विशेष्यात्मभेदग्राहकेण तत्त्वमस्यादिप्रमाणेन
बाधितत्वात् न वा नात्मभेदग्राहकस्य प्रत्यक्षादेर्बाधकमस्ति न वा नात्मस्वरूपगोचरत्वेपि प्रत्यक्षादेर्न भेदगोचरत्वं
धर्मिप्रतियोगिभेदानां ग्रहे क्रमयौगपद्यादिविकल्पप्रामाण्योन्याश्रयानवस्थाप्रसंगोपाधिनिगम्यत्वाद्यनेकदोष
ग्रासादिति वाच्यं अतिरिक्तभेदगोचरत्वेपि स्वरूपभेदगोचरत्वस्य दुरपह्नवत्वात् न च स्वरूपमात्रमिति प्रतीत्युपप
त्तिः आत्मन्यैतन्मयमितिवदुपपत्तेः न च भेदस्वरूपशब्दयोः पर्यायत्वापत्तिः व्यवहारे इतरसापेक्षत्व निरपेक्षत्वाभ्यां वि २५
शेषात् न वा भेदे तदनुपपत्तिः एकस्मिन्नपि देवदत्तेपि पितृत्वादिव्यवहारार्थं पुत्राद्यपेक्षादर्शनात् न च प्रमाप्रमाविवेके
न स्वापेक्षत्वमेव भेदो। इति वाच्यं तस्यापि स्वरूपानतिरेकात् न च स्वरूपाद्यपस्य भेदस्य निःस्वरूपत्वापत्तिः अन्यथा स्वरूप रामा

मेवाखंडमितिवाच्यं घटाघटस्य भेदेस्य घटत्वादर्शनात्॥ न च घटादेकस्मात् घटान्तरे वैधर्म्याभावस्यैवेतिवाच्यं स्थितस्या
पितस्योक्तदोषेण भेदस्यानंगीकारात्॥ न च वैधर्म्याभावस्यैव स्वरूपं भेद इतिवाच्यं अनात्मस्वरूपाणामपि वैधर्म्याभावात्॥
यत्तु केचिदुक्तं यथायथं चिंतयामो वयं। यथा घटादौ स्वरूपं अन्योन्याभावो वैधर्म्यं वा सामान्यादौ तु द्वयमेव वैधर्म्यं भे
वात् अभावे स्वरूपमेव इतरासंभवादिति तत्र स्वरूपस्य भेदस्यावश्यकत्वादितरयोश्च व्यभिचारात् भेदव्यवहारप्रयोजक
त्वेनांगीकारे वैयर्थ्यात् एकाकारव्यवहारस्यैकरूपविषयसाध्यत्वनियमात्॥ न च स्वरूपभेदपदे घटस्मादपि घटस्यै
दः स्यादितिवाच्यं स्वस्य प्रतियोगिकोटिनिवेशे स्वस्य धर्मिणो विरहात् धर्मिकोटिनिवेशे वा प्रतियोगिनो ऽभावात्॥
न च भेदस्वरूपयोः परस्परान्तर्भावेनान्यतरपरिशेषापत्तिः भेदस्य स्वरूपानतिरेकात्॥ न च स्वरूपं भेदः किं भिन्नो भेदव्यवहा
रप्रयोजकः भिन्नो वेति विकल्पावकाशः अयमुपस्थितवस्तुमात्रे वैधर्म्यप्रतियोगिज्ञानापेक्षानपेक्षाभ्यां भेदाभेदव्यवहारयोर्भी
यमानत्वात्॥ अज्ञानकार्यत्वं प्रपंचस्य सर्वत्रोक्तं तत्कथं प्रत्यज्ञाघज्ञबोधेन भेदाशंका इति चेन्न तस्यैवासिद्धेः अज्ञानकार्य

त्वस्यवक्तुंशक्यःश्रवणात्सदेवसौम्येदमग्रआसीत्यतोवाइमानिभूतानिजायन्तेआत्मनआकाशःसंभूतएवमेतस्माद्वा
सिद्धमु त्मनःसर्वेदेवाःसर्वेलोकाःसर्वएतेआत्मानोव्युच्चरन्तीत्यादिश्रुतिभ्यःजन्माद्यस्ययतइतिसूत्राच्चसर्वस्याज्ञानकार्यत्वमपि
वक्तुंशक्यंतेमृत्युनैवेदमावृतमासीत्तद्धेदंतर्ह्यव्याकृतमासीत्इन्द्रोमायाभिःपुरुरूपईयतेमायांतुप्रकृतिंविद्यान्ना
२६ सदासीन्नोसदासीत्तमआसीदित्यादिश्रुतिभ्यःमायायाअनेककार्यत्वेनानन्तत्वंकथंरूपंचादितिन्यायाच्चएवंतर्हिश्रुती
नांपरस्परविरोधादेकतममपिकारणमङ्गीकर्तुंशक्यतेतत्कारणमितिचेत्।यथायोगंपरमाण्वादिकमेवंतस्मादन्ना ९
त्मनेदेप्रत्यक्षादिसिद्धेजगत्कारणेकथमद्वैतसिद्धिःतदयंसंग्रहः।आत्मानेदृश्यमित्यापिनाद्वैतंतेप्रसिध्यति।अना
त्मनोदृश्यसिद्धेःप्रत्यक्षादेःप्रमाणतः।नैवंश्रुत्यनुमाबाधापरिहाराभावात्।नहितत्त्वमस्यादिश्रुत्याअनात्मानंपृथक्कर्तुंशक्याए २६
पित्वात्मत्वंद्वयोरभेदोबोध्यतइतिश्रुत्यभिप्रायःकिंचप्रत्यक्षंचेतत्त्वेनदृष्टेनागराघववस्थात्रयंकर्त्वलाघनर्थजातंवत्म राम
मिवाशिर्वतत्रैवाद्ब्रातेमाक्षिणप्रत्यक्षस्मामिप्रत्यक्षप्रतिरेकात्तदनिरेकेणतस्यस्वरूपंनास्तीतिनिर्दिष्टस्यस्वरूपेणप्रत्यक्षगात्मका

ब्रह्मणो॥ भेदसिद्ध्यर्थं ब्रह्मण्यपि जगत्कर्तृ॰
त्वपरोक्षादि आकाशादिकं च जगत्तत्तमनन्तगतमनुगतं तस्मिन्सच्चिदानन्दात्मन्यध्यारोपितमसद्रूपत्वेन प्रतिपन्न
मिति। अन्वयव्यतिरेकाभ्यां अध्यारोपापवादाभ्यां यमाश्रित्य प्रवृत्तं तत्त्वमसि वाक्यमनन्तरं प्रवृत्तं तेनेति नेत्यादिवाक्येन च बाध
यति। ततः शुद्धयोस्त्वंपदार्थयोर्लक्ष्यभूतयोर्निरस्तसमस्ताज्ञानात्मसंबंधयोर्भेदं भेदे वा प्रमाणप्रमाणफलप्रपञ्चसंदिहानः स्वं
सारोगराजान्तर्गर्भवासाद्यनेकरोगसमुद्भूतदुःखजातान्जन्मवासादितो द्वेगः ब्रह्मलोकपर्यन्तमपि तुच्छं
षमिव मन्यमानः तरति शोकमात्मविदिति श्रुत्या संसारदावानलप्रसूतसंतापशमनामृतादिप्रमात्मविद्या ज्ञाना
परमजितासुर्य्युत्तमपरोक्षदर्शने परमकारुणिकगुरुमुपसर्प्यति। तेन च शुद्धयोस्तत्त्वंपदार्थयोरभेदे तत्त्वमसि आदिवाक्येन
नित्यनिर्दोषेणाबोधिते स्वयमेवाद्वैतं साक्षात्कृत्य परमानन्दस्वरूपमात्मारामो भवति। अतः श्रुत्यभिप्रायापरिज्ञानविजृं
भितमेतद्यदनात्मभेदेनाद्वैतव्याहतिरिति। यच्च स्वरूपं भेदं प्रत्यक्षादिगोचरयति तदपि तुच्छं प्रत्यक्षादेरसद्विषयत्वे
न स्वरूपागोचरत्वात्स्वरूपस्य भेदत्वानुपपत्तेश्च। किञ्च इति चेत् सर्वेषु किं स्वरूपं सर्वधर्म्माविनिर्मुक्तं स्वरूपं भेदः किं वा

अभेदेवाविशिष्टस्वरूपा ४

सि·मु विशिष्टं।आद्येव्यवहारस्येवत्वमपिनाशीतिवक्तव्यंतथाचसर्वेव्यवहारानास्पदंसर्वधर्म्मविनिर्मुक्तंअस्थूला
नणवादिश्रुतिसिद्धंसत्स्वरूपकंकथंचैतन्नामात्रंणप्रत्यक्षादिगोचरस्वरूपकंस्यात्।तेनचतदर्थकपदघटितेनवक्तुं
घटितेनैववाक्येनाच्येहेविशेष्यस्यकर्म्मणोवेत्यादिश्रुतिविरोधप्रसंगात्।द्वितीयेविशेषणविशेष्ययोर्भेदेवि
शिष्टस्वरूपान्तरंभेदइतिवाच्यंतथाचतत्राप्ययंतत्राप्ययमितिपर्यवसानं नवस्थापत्तिः।नवाविशिष्टं
२७ स्वरूपप्रत्यक्षादिगोचरः।तस्यापिशुद्धवस्तुस्वरूपवन्निर्द्धर्मकत्वात्।नहिरूपादिविशिष्टेरूपादयःसन्निकर्ष
विशिष्टंनामकिंचिदस्त्यपि।विशेषणविशेष्यतत्संबंधातिरिक्तस्यतस्यानन्तप्रकारतैःतेषांचप्रत्येकमप्रत्यक्षत्वात्।संवि
शिष्टव्यवहारानन्तता।तेनचसंबंधएवविशिष्टंविशेषणविशेष्यातत्संबंधात्मकत्रयसंबंधेपितद्व्यवहारदर्शनात्।विशे २७
षणविशेष्यस्वरूपव्यवहारानापत्तेः।नचवस्तुस्वरूपंभेदइतिशंक्यंकिंतुममापिशक्यंतस्यविदारणात्मनोवस्तुस्वरू
पनाशरूपत्वात्।नाशतत्प्रतियोगिनोरभेदासंभवात्।नहिपटविदारणंपटस्वरूपंवस्तुस्वरूपान्तिरिक्तस्यचतस्य नि॰ रामा

या २

स्वरूपस्य निराश्रयस्यासिद्धिरेव न हि निर्विशेषमाश्रयमाश्रयो भवति। अन्यथा धर्मोपि घटोऽनलाधारस्स्यात्। अपि
नि आश्रये भेदो विरोधादेव न वर्त्तते। तस्मादलमनेनानल्पविचारेण सर्वथाप्यन्यस्मादेवात्मानामभेदो वरं वैनाशीति
सिद्धं। यदुक्तं जगत्कारणविषयश्रुत्योरन्योन्यं ब्रह्मेश्वरयोर्मिथो विरोध इति तत्र। ब्रह्मज्ञानाज्जगज्जन्म ब्रह्मणो का
रणं च तत्। असिद्धा नवमात्रेण कारणं ब्रह्मणोपि ततो हेत्वपबाधानुमानसिद्धा निर्वचनीयस्य जगतः। नाद्या निर्वचनीया वि
द्यैव कारणं। न ब्रह्म तस्य कूटस्थस्य कार्यकारणविकल्पनायाच। तदेतदुक्तं पूर्वमपरमनन्तरमबाह्यमयमात्मा ब्र
ह्म सर्वानुभूरिति श्रुतेः। कथं तर्हि ब्रह्मणः कारणत्वं श्रुतौ प्रसिद्धं जगत्कारणमविद्या न चैतत्कारणत्वोपचारात्। व
स्तु कारणश्रुतेरन्यार्थत्वात्। एकमेवाद्वितीयमिति श्रुतेरद्वितीयत्वैतावद्ब्रह्मणः सिद्धं। तत्कथं संभाव्यतामिति कार्यका
रणयोरभेदस्तावल्लोकसिद्धः ब्रह्मापि जगत्कारणमिति कथमसंभावना स्यात् द्वित्वाद्वितीयत्वं भावनाबुद्धिमात्रप्रयोज
नत्वात्तस्याः। न वा ज्ञानमपि जगत्कारणं श्रुत्या विवक्षितं। तस्य भ्रमनिमित्तत्वमात्रत्वेनैवोक्तत्वात्। कार्यकारणवादस्य

सि·मु वेदान्तवद्भिर्मतत्वात् ॥ विवर्तवादस्यैव वेदान्तवादत्वात् ॥ किं जगतः कारणमिति निरुक्ते प्राप्तां प्रतिज्ञानिवृत्तिमात्रव्यपो
जनतया ज्ञानं कारणमित्यभिहितत्वात् ॥ न चेदमज्ञानं कार्यमकार्यं वा ॥ आद्ये किमस्य कारणं अज्ञानं ब्रह्म वा ॥ नाद्यः ॥
तेनैव तज्जनने आत्माश्रयात् ॥ अज्ञानांतरस्वीकारे चानवस्थापत्तिप्रसंगात् ॥ न द्वितीयः ब्रह्मणो ऽकारणत्वात् ॥ अनि
र्मोक्षप्रसंगाच्च ॥ द्वितीये चनाद्यविद्यावस्थानिवृत्तिप्रसंगः ॥ ब्रह्मवद्वा ॥ न च विकल्पिताविकल्पितासौ विशेषः कल्प
२८ नासामर्थ्यज्ञानेन कल्पितत्वादुपपत्तेः ॥ न चानादेरध्यासत्वमसत्वासिद्धेः ॥ विद्यावाध्यत्वात्तत्सिद्धिरिति चेन्न ॥ अन्योन्या
श्रयात् ॥ न वैते दोषा वस्तुनो वस्तुत्वापहारकाः कल्पितस्य वा ॥ नाद्यः ॥ किमेते कर्तुः ॥ अत एव तस्य वस्तुत्वाभावात् ॥ अ
त एवोक्तं अलंकारो ह्ययमस्माकं यदघटकत्वं प्रमाणात्वाद्दुर्घटत्वं सुघटत्वे कल्पितत्वं दुर्घटं भवेदिति वार्त्तिकं ॥ कल्पितत्वे चैव २८
वाध्यासिद्धत्वात् ॥ धर्मिण एवासिद्धेः ॥ ननु केयं सिद्धिः ॥ उत्पत्तिर्ज्ञप्तिर्वा ॥ नाद्यः ॥ अनादेस्तदभावस्येष्टत्वात् ॥ न द्वितीयः ॥
साक्षिसिद्धत्वेन तदभावात् ॥ मैवं अज्ञानस्य साक्षिसिद्धत्वे साक्षिणो ऽसंगत्वप्रसंगात् ॥ संबंधं विना स्वाप्रकाशकत्वात् ॥ न च परा रामा ॥

दे४

रमार्थिकसंबंधाभावेपिकल्पितःसंबंधोस्त्येवेतिवाच्यं।संबंधसंबंधिनामन्यतमेनकल्पितत्वेप्रा।तत्राश्रयाश्रयोश्च
यस्तुरूपस्यत्वहस्तस्यसंगतत्वमितिमेतत्।नावप्रसंगानायथापथ्यप्रसंगः।नवाविद्याध्यासवत्संबंधाध्यासस्याप्यन
दिलेन।विद्यादिदेहत्वाध्यस्यापिततंत्रतया।तन्निवृत्तौनिवृत्तिःस्यादितिवाच्यं।तस्यानादेस्सत्त्वेनिरपेक्षस्यस्यापसंबंधी
तत्वात्तस्यान्तानानाम्पेतयातत्त्वेचवाचानुपपत्तेः।नचसंबंधितानाधीनंसंबंधत्वंलोकेदृष्टमितिवाच्यं।तस्यापि
त्पत्तिदिसिद्धस्य।तत्सापेक्षत्वेपीहसंबंधिनोस्थत्वानस्यापिकिंचित्संबंधापेक्षस्फूर्त्तिकत्वेनवैपरीत्यात्।नचसंबंधस्य
स्थितस्यापेक्षसंबंधिनमपेक्षतइतिवाच्यं।लक्षणसत्ता।स्फूर्त्तिकस्यैवस्थितिरपेक्षणात्।हेतुनपेक्षत्वेस्वरूपानपेक्षस्थि
तिकत्वात्।नवात्तानस्याहङ्कारस्यात्वदृष्यस्यपरहा।उपलम्भ।उपलब्धेरितिवाच्यं।नित्योपलब्धेतत्स्वरूपस्यात्मनो।नुप
लंभानुपपत्तेःजीवस्वरूपजगदुपादानस्यात्मनस्यापिनाभावस्वरूपत्वात्अनुपपत्तेश्च।तथाचाहात्मतस्याभावाद् कथंतदु
पादानत्वेनोपचर्यस्यात्मस्थितिमेवं।प्रश्नस्य तादात्म्येपेक्षतियोगिधीः।अवश्यंभाविनी।हर्षविरोधस्स्यादि

तानपूर्व ३२

सि॰द॰ तोऽन्यथा॥ कथमज्ञानसिद्धिरिति वदन् प्रष्टव्यः किमयं अज्ञानस्वरूपविषयकः प्रश्नः किं वा तत्स्वरूपाद्याक्षेपः तत
त्स्वरूपसाधककथ्यमानप्रमाणविषयको वा। नाद्यः अज्ञाते स्वरूपे प्रश्नानुपपत्तेः प्रश्नात्पूर्वमज्ञानस्वरूपसिद्धेरवश्यंभावात्
ज्ञानस्वरूपं सिद्धमिति किं तत्र प्रश्नेन वस्तुसामान्यज्ञानाद्विशेषजिज्ञासा प्रश्न उक्तदोषात् न द्वितीयो पृच्छको ज्ञ
२९ ... ज्ञानस्य प्रतियोगिज्ञानसर्वेकत्वनियमेनाज्ञानस्वरूपासिद्धेः पूर्वमेव दत्तत्वात् न तृतीयोऽपि प्रथमोपस्थितस्याज्ञानस्या
क्षेपो न्याय्यः यतः केन कुत्र ... इति पृष्टे परोक्षशङ्का ... ज्ञानविषयकस्येवोक्तत्वात् तथा च प्रथमस्य सम्मान
विषयकाज्ञानोपपादकत्वादेव ज्ञानविषयकापराज्ञानस्वीकारे अनवस्थादुर्वारा तत्र हि एकाज्ञानामसिद्धिप्रयुक्तपाक्षे
पे अप्रयुक्तज्ञानस्यानेकाज्ञानस्वीकरणे मदीयमतस्य स्वव्याघातगौरवपर्य्यवसिद्धिदोषमपश्यतः स्वपक्षनिर्वाहोऽप्यसु २९
तरत्वान्नैवं कश्चित्तत्वादिप्रश्नाक्षेपयोः सत्वात् तुल्यः पर्य्यनुयोग इति वाच्यं अज्ञाततयाऽभ्यासिसिद्धेः ज्ञाननिवृत्त्यर्थं
प्रमाणप्रश्नस्य प्रमाणादर्शनेन स्वरूपतिरस्कारे रूपस्यावाक्षेपस्य कर्तुमशक्यत्वात् अप्रयुक्तहि ममापि साक्षिसिद्धं ह्या रामः॥

नेषमाणप्रश्नः समं नमः एवं तर्हि अज्ञानसाक्षिणोः संबंधोपि वाच्यः अ यथा साक्षिणः साधकत्वानुपपत्तेः तथा
ज्ञानतत्संबंधयोरनादित्वमपि अन्यथा सर्वैक्यस्येदानीं संसारोपलंभः स्यात् न च सर्वमप्यज्ञानान्तरमेवेति वाच्यं
अज्ञानपरंपरातः एकस्यैव लब्धत्वात् तद्द्वयेनयेन विनानुपपन्नं तत्सर्वं संबंधं अनादित्वमनिर्वचनीयत्वं चाघट
पत्वं विचित्रशक्तिमत्वमेकत्वं अन्यद्वा यत्किंचिदपेक्षितं तत्सर्वोपपादकत्वेन कल्पयतीत्यपि वाच्यं तथा च प्रमाणप्र
श्नः न पर्यक एव अज्ञानस्य साक्षिणैव सिद्धत्वात् न च ज्ञानविषयाज्ञाननिवृत्त्यर्थं प्रमाणप्रश्नोऽङ्क इति वा
१२ च्यं तद्भावात् अज्ञानस्य प्रमाणेन ज्ञातुमशक्यत्वाच्च तेन तस्य विरोधात् तदयं तमोदीपन्यायः तथा हि अ
ज्ञानं ज्ञातुमिच्छेद्यो मानेनात्यन्तमूढधीः ॥ स तु नूनं तमः पश्येद्दीपेनोत्तमतेजसा ॥ तथा वा ज्ञानं कथमिति प्र
श्नेवात्माज्ञानस्योपपादनीयमिति चेत् तत्र स्वसिद्धे कथं नानुपपत्तिरेव । कुतस्तर्हि मम मुक्तिः कर्तव्या यद्येवमज्ञान
र्थजा । तत्प्रसवबीजस्यात्माज्ञानस्य स्वानुभवसिद्धत्वात् तत्त्वमस्यादिवाक्यजन्यापरोक्षब्रह्मात्मसाक्षात्कारेण ।

सिद्ध ज्ञानबाधादेवेति सिद्धान्तेनोक्तो ग्रंथाभावः तत्र सर्वेषामप्ययमप्यधिकरणप्रकार कथं निश्चयस्तस्यापेतत्तत्र अन्य
थाख्यातिनैयायिकारीत अज्ञानस्याबाधात ...स्वप्नादिलाभा ज्ञाननिवृत्तिरित्यस्मदीयाः केचित्तु तदप्यापातरमं
२० णीयं प्रत्येकसमुदायाभ्यामभावात् किं वर्जयंति निवृत्तिः ध्वंसमभावो वा ज्ञाननाश्यः स एव वा पदार्थांतरमेव वा आत्मस्व
रूपं वा नाद्यः मुद्गराद्याघातजन्यघटादिध्वंसेन तस्य व्यभिचारात् न द्वितीयः उत्तरज्ञाननाश्यपूर्वज्ञानध्वंसेन तथा व्य
भिचारात् ज्ञानमात्रध्वंसेति व्याप्तेः न तृतीयः तदर्थं साध्यापत्तावपि तन्निवृत्तावद्वैतक्षतेः न चतुर्थः तस्यानित्यसिद्धत्वे
न ज्ञानवैयर्थ्यापत्तेः तस्माद्बाधस्यैवानिर्वक्तुमशक्यत्वात् कथमज्ञानं तत्कार्यं वा बाध्यमिति अत्रोच्यते प्राज्ञ ३०
तत्कालेन च विषयानेसमनन्तरं निवृत्तिः अध्यस्यमानेन नाशनीतिवा धस्त्वमवबुध्यते बुधैः॥ स्थूलदेशे विपरीतमध्यस्यप्र
वर्तमानस्य निवर्तमानस्य वा पदार्थस्य ज्ञानविषयकं वाक्यजं ज्ञानं परोक्षमपरोक्षं वोत्पन्नं तदनंतरमिदमिह कालत्र राम॥
येपि नास्तीति योयं निश्चयः स एव बाध इति सर्वसंमतः अनुभवसिद्धं न बाध्यत्वमात्मा तिवा रेप्यप्यस्यार्थस्यार्थात तत्पर्यवसा

नमस्तीतिवाच्यंतत्राध्यस्यमानस्यान्यत्रसत्त्वाभ्युपगमात्एवंब्रह्मात्मनाज्ञातकारणेज्ञातेऽज्ञानेतत्कार्यंचसर्वं
यावत्किंचित्तत्राध्यस्तंतत्सर्वंतत्कालत्रयेपिनास्तीतियोनिश्चयः सांख्यसत्त्वसिद्धिःसएव नचतस्यबाधकस्तुच्छ
ते।अतएवप्रतिपन्नोपाधौनिषेधप्रतियोगित्वमनिर्वचनीयत्वमितिसंप्रदायविदांलक्षणमपिसमंजसंनचो
त्तरकालीननिषेधप्रतियोगित्वेपिवर्त्तमानातीतकालयोःसत्त्वात् नत्रैकालिकनिषेधप्रतियोगित्वमनि
र्वचनीयत्वमितिवाच्यं अनिर्वचनीयापरिज्ञानान्नूनंहिकादाचित्कत्वमात्रेणानिर्वचनीयत्वंभवति।परा
भिमतस्यात्मस्यापिघटादेस्तथात्वात्॥नचाविघटकत्वेनविशेषःकारणस्यनामात्रस्करणापत्तेः नवद्यानचा
ध्यत्वेनविशेषःतस्यापिसतोनास्तित्वप्रमित्यनुपपत्तेः नचसकलकार्यकारणबाधरूपस्यनास्तीतिप्रत्ययस्य
बाध्यांतरंस्वरूपमन्यथा।हेतुकृतिरितिवाच्यंतुच्छातिरिक्तसर्वबाधरूपस्यातस्याबाधान्तर्भावेनैवतथात्वात् नचतुच्छा
तिरिक्तमस्तिनास्तिवेतिविकल्पावकाशः अनिर्वचनीयत्वेनपहृतत्वात् अख्यात्यात्मख्यात्यसत्ख्यातिवादेष्वप्रमा

यंत्रक्षर

२२

सिद्ध धर्म्मवस्तुन्यनुपपत्तेरन्यथाख्यातिवादिनैव दर्शितत्वाच्चेद्यत्पत्ते ग्रंथगौरवभयाद्वात्मविचारप्रसङ्गे तस्याप्यबाधकत्व
त्वादेते अध्यस्ते चैकालिकासत्त्वनिश्चयो बाध इति सिद्धं तथा च शुक्तिरजतस्य मिथ्यात्वादिवाक्येऽप्यस्य मध्ये जन्ममा
त्रत अविद्यासहकार्य्येण नासीदस्ति न भविष्यति॥ अथ कथं विद्याया अविद्याबाधकत्वं विरोधादिति चेत् कस्तर्हि
३१ तयोर्विरोधः किमेककालानवस्थितत्वं उतैकदेशानवस्थितत्वं आद्ये सिद्धत्वाद्याद्यघातकत्वं अथवा नाशनाश्यात्मक
त्वं वा नाद्यः सूर्य्यज्ञाविन्याः विद्यायाः सहाविद्याया एककालावस्थितत्वात् विद्योत्तरमविद्या निवृत्तेः अन्यथा विद्यावैय
र्थ्यात् न द्वितीयः समानाधिकरणयोर्विद्याविद्ययोर्विरोधाभावेनैकाधिकरणत्वस्यावश्यं वक्तव्यत्वात् न तृतीयेऽध्यस्य
तो बाध्यः यत्कर्त्तृत्वं बाधकत्वं घटादौ चा नश्यत्कर्त्तृत्वं घातकत्वमिति चेत् तर्हि विद्याविद्ययोः घटतत्परदार्थः कश्चित्र
उत तद्धर्म्मः तदा तत्स्वैव बाध्याधेवस्यास्य ध्वंसो नस्यात् भिन्नवद्धि धर्म्मयोरिव परस्परमसंबंधात् द्वितीये धर्म्म एव धर्म्मिणो ३१
दीर्घात्पुच्छमानयति अन्यथा निराश्रयो धर्म्म एव न स्यात् तृतीये विद्याः विद्योपादिकैवेति कल्पो विरोधः राम॥

सिद्ध॰ पातानाशीतिवाच्यं प्रारब्धस्याप्यविद्याकार्यत्वात्तस्यावेष्टाद्युमशक्तेः। तत्वज्ञानविपटस्यैव न च प्रारब्धकर्मफलभोगनिर्वा
हकतया किंचित्कालमविद्याप्यनुवर्त्तत इति वाच्यं विद्याया अविद्योपमर्दकत्वेन तावन्मात्रानिप्रसंगात्तत्रैवोत्तरकाल एव तथा
त्वमादेशकस्य च ज्ञानाद्बुध्यानकम्पामात्रं मन्तव्यं आवरणशक्तिप्रधानमज्ञानं निवृत्तमेव विक्षेपशक्तिप्रधानं त्वनुवर्त्तते प्रारब्धनि
३२ र्वाहाय इति वाच्यं अज्ञानद्वयाभावात् न चैकस्यैवाज्ञानस्य शक्तिद्वयविशिष्टस्यैकस्य युगपच्छक्तिनिवृत्त्योः विरुद्धत्वात् न च शक्ति
निवृत्तिमात्रमेव विवक्षितं शक्तिशक्तिमतोरभेदात्तत्त्वज्ञानेन न निवर्त्तते न च प्रारब्धनिवृत्त्या तन्निवृत्तिः तस्याश्च
प्रमाणाभावात् न च तदेव तत्त्वज्ञानमेव प्रतिबन्धं तन्निवर्त्तकमिति वाच्यं प्रारब्धनाशे देहपाताने तत्त्वज्ञानस्यैकान्ताभावात्
सर्वदा तस्य प्रारब्धेन प्रतिबन्धात् न चाविद्यासंस्कारो लेशाविद्याशब्दाभिधेयोऽनुवर्त्तत इति वाच्यं तस्याप्यविद्या ३२
कार्यत्वात् अविद्याभावे चैव संस्कारश्च द्वयोरप्यसामर्थ्यात् जीवन्मुक्तिप्रतिपादकश्रुतिस्मृतिप्रामाण्याद्विदुषो रामा।
देहस्थितिः कल्प्यत इति चेत् न शास्त्रस्य जीवन्मुक्तिप्रतिपादने प्रयोजनाभावात् मुमुक्षूणां श्रवणादौ प्रवृत्तिः प्र

क्तुर्थः विद्याविद्ययोस्तयोरपि स्वाभावरूपत्वात् तत्र विद्यायाः प्रागभावरूपत्वस्य निरस्तत्वात् ॥ अन्यथा एककालावस्थानं न स्यात् त
स्मात् विद्याविद्ययोर्विरोधस्य निरंकुशमशक्यत्वात् ॥ कथं विद्याया अविद्याबाधकत्वं विपरीतं वा किं न स्यादिति चेन्न उच्यते । उप
मर्द्यस्य प्राबल्यमविद्याया विरोधिता । तत्र कार्ये तु विद्यायाः प्रकाशतमसोरिव । यद्यपि विरोधस्तत्र मिह निरंकुशमशक्यं तथाप्युपम
र्द्योपमर्दकभावलक्षणो विरोधः शक्यः । अतएव निरंकुशः अविद्योपमर्दकत्वस्य विद्यास्वभावस्यान्वयव्यतिरेकाभ्यां लोकप्रसिद्धत्वात् न
च विरोधित्वा । विशेषे विद्योपमर्दकत्वमेव । विद्यायाः किं न स्यादिति वाच्यं तथा व्याप्तति विद्योत्पत्तिरेव न स्यात् तदुपमर्दिका या अ
विद्यायाः पूर्वमेवावस्थितत्वात् प्रतिनियतत्वसामान्यस्य पर्यायत्वे योः क्रमशक्यत्वात् । यथा प्रकाशतमसोः न वस्तुत्वैपरीत्यं शक्य
यथा तेदृष्टविरोधात् न च वर्तते कथं प्रयोजकदोषप्रसक्तिः उपमर्दस्य कालत्रयेपि नास्तीति अपि तिष्ठत्यस्य बाधा परपर्यायस्य विद्योत्पत्तिर्जाय
मानत्वात् ॥ न च विद्योपमर्दकत्वं भावत्वे वेतरविद्याया अपि द्विविधो विद्यो । तत्र पन्नतरमविद्यायाः सकार्यायाः समूलकाषं कषि
तत्वात् ॥ नन्वेवं विदेहकैवल्यप्राप्तौ देहपातप्राक्कालिकं स्यात् तथा वा ... समुदायः स्यात् न न प्रारब्धकर्मसामर्थ्याद्देह

योजनमितिचेत्‌अस्तुतर्हिश्रवणादिविधेरर्थवादत्वंतुशास्त्रं तथाचलौकिकवैदिकप्रमाणविरोधात्तेनकथंवि
द्वत्सो देहस्थितिः कल्प्यत इति न वस्तुतः केषु दृष्टांतेन प्रारब्धस्थितिः साधितेति वाच्यं दृष्टांतवैषम्यात् तत्र कुम्भीया
दानस्येषोरनाशात् न तु जीवन्मुक्तौ सार्वलौकिकी प्रसिद्धिरस्याहतेति वाच्यं प्रमाणविरहेण प्रसिद्धेरंधपरंपरात्वात्
नयाप्रामाणिकस्य शास्त्रकारैरनुत्पादन मनर्थकमिति वाच्यं शिष्यस्याविद्वत्त्वयाथार्थविश्वासपरिहारप्रयोजनत
यातस्यार्थवत्वात् तस्माद्विधापाठाविद्योपमर्दकत्वस्याभासात् विद्वत्त्वःसद्योमुक्तो नोपदेष्टृत्वाभावात् उक्तो विद्योत्प
त्तिः॥ नवाचार्यनिरपेक्षैव विद्येति सांप्रतं आचार्यवान्पुरुषो वेद ॥ नैषा तर्केण मतिरापनेया प्राप्य वरान्निबोधत आचा
र्यस्तेगतिंवक्तेति अनन्यप्रोक्ते गतिरत्र नास्ति प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठेत्यादिश्रुतिसत्त्वात् नैष दोषः कल्पितोऽप्युपदेष्टा
स्याःस्य यथाशास्त्रं समादिशेत् ॥ न च विनिगमको दोषो विद्याकथेन न निर्णेयात् ॥ यद्यपि विद्वत्त्वमिदानीमेव वस्तुकृत्वात् प्रारब्धा
र्थिकः कश्चिदुपदेष्टा नास्ति तथापि कल्पितेन गुरुणा विद्योत्पत्तिसंभवात् अनुपपत्तिःशंका विद ॥ न च कल्पितस्य कथं सम

सिद्धं॰ ज्ञानजनकत्वमिति वाच्यं शास्त्रवदुपपन्नेः प्रतिबिंबलक्षणत्ववदुक्तशिष्ययोर्म्मध्ये कतरः कल्पित इत्यविनिगमो दोषः इति या
वां अविदुषः कल्पकत्वात् तद्गुरोश्च विदुषः कल्पनायोग्यत्वाभावेन तथात्वानुपपत्तेः तस्माच्छास्त्राचार्य्यप्रसादासादित तत्त्वमादिवा
क्योत्थसाक्षात्कारेण मोक्षाविर्भावप्रतिबंधकाज्ञाननिवृत्तिरूपकार्य्यतिरस्कारसमनंतरं नित्यशुद्धबुद्धमुक्तस्वभावाद्वितीयानंदात्मा
33 तिमन्पतेततः कृतकृत्यो भवति अत एव भूमैव सुखं आत्मानमानंदं सर्वज्ञाद्विनिश्चितिलेति विज्ञानमानंदं ब्रह्म को ह्येवान्यात् कः प्राण्या
द्यदेष आकाश आनंदो न स्यात् सैषानंदस्य मीमांसा भवति एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंति एकरूपं ततो भूयश्चैव
तु णिरित्यास्यानंदो ब्रह्मेति व्यजानात् यो वै भूमा तत्सुखं नाल्पे सुखमस्तीत्यादिश्रुतिशतेभ्यः। न वा अरे पत्युः कामा 33
य पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवतीत्यारभ्य न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति आत्मनस्तु कामा
य सर्वं प्रियं भवतीत्यंते नसुखसादनादात्मन आनंदरूपत्वस्यानवाप्यानंदयोर्द्धर्म्मो आत्मनि संभवति न वा आद्ये किं सत्त्वा रामः
आत्मसत्त्वाबाधात् द्वैतापत्तेः नेतरः धर्म्मिणो नानंदत्वापत्तेः। न हि रजतत्वं शुक्तावारोप्यते तद्वत्। न वानानंद

चप्रानंदभिन्नत्वं तद्घनाम्नी । तिवाच्यं तथाप्यानंदस्वरूपत्वासिद्धेः न द्वितीय आनंदत्वोनाश्रये आनंदव्यवहारादर्शना
त्तन्नैवमसर्वव्यवहारापत्तेः । लौकिक एवायमानंदः लौकिकवैदिकपदार्थयोरैक्यात् अन्यथा लोकवेदाधिकरणविरो
धः नैव वाक्यार्थ एवायमानंदः तेनाप्यानंदत्वाप्रतिपादनात् अखंड एव तात्पर्यात् तन्नैवमसर्वथा । लौकिके सुखे कल्प
पिकापनासंभवत्वतित्वेयर्थादेरपि लौकिकसुखस्वजातीयत्वात् अत्र केचित् आनानंदत्वं व्याप्तिसिद्धिमावमानंदत्वं न तु प्रसिद्ध
४ आनंद एवात्मा धर्म्मधर्म्मिभावानभ्युपगमात् नैव व्याप्त्यापि द्वितापत्तिः तस्या आश्रयानतिरेकात् । एतेन ज्ञानत्वादयो व्या
ख्याताः तन्न व्याप्तेरपरार्थत्वात् स्वरूपोद्वावादापत्तेः व्यावर्तकधर्म्मस्यावश्यं वक्तव्यत्वात् अन्यथा व्याप्त्यसिद्धेः नैव स्वरूपेणैव
व्याप्तिः आत्मनो व्याप्तत्वात् अन्यथा ब्रह्मत्वापत्तेः अन्ये तु आनंदत्वादयो धर्म्मा परिकल्पिता अयं च आनंदादिपदा
र्था लोकेपि प्रसिद्धाः तत्राप्यानंदत्वादीनां कल्पितत्वात् तन्नैते तावतानंदस्य काचित् तदतिरिक्तधर्मस्यानुपादेयत्वात् तदाश्रय
स्यैकरेवाखिलघणीयत्वात् तदप्यापातरमणीयं निबप्रतिभाति विशिष्टस्यैवानंदपदार्थत्वे व्यक्तिमात्रेतर नुपपत्तेः फ

लि॰द॰ ल्पितानंदत्वाश्रयस्यानंदत्वनिष्ठत्वेऽथ नहि धियोऽर्थप्रमापत्तनत्वाभावि कल्पदत्वसौ वितीयपदार्थः संभवति। अथ च तस्य
देवपरिच्छिन्नपदार्थता पत्तेः॥ अथोच्यते आपाततः पिर्सं अपरोक्षात्माआ नंदत्वं तदाश्रयत्वविशिष्टशक्यपदे इत्युच्यते किंवा
शक्तिरोचकपदेति लोके आनंदत्वविशिष्टपदानां पदार्थं शदाय्यात्तेवा नंदपदार्थस्तु स्वयमेक एवं नानोपाधय
३४ प्रविष्टस्यास्तु गतत्वाच्चत्रि उद्धिजनकस्याज्ञा नित्यस्य स्वपदरूपस्योपपत्तेः उपायस्तु प्रविष्टत्वं दर्शित्वदित्यं
लक्षणात्वेऽथवा व्यक्तिरेव सर्वत्र पदशक्तिः को वेऽस्मिन्नवाऽनन्यव्यभिचारदोषप्रसंगः। विशिष्टशक्यपक्षेऽपि तुल्य
त्वात् विशेषणस्य विशेष्यभेदेन प्रतिविशेष्यं विशिष्टभेदात्तस्मादशक्येनापि शक्यतावच्छेदकेनानुगतशक्य
व्यवहारशक्यव्याहत्तिव्यवहारयोर्जनयितुं शक्यत्वात्तत्रापि शक्तिकल्पने मानाभावात्कारणस्वरूपवहिर्भूतकार ३४
णतावच्छेदकवत्तस्मादानंदरूपत्वे आत्मनो नकाचिदनुपपत्तिः। आनंदरूपमात्मानं प्रत्यक्षं दहयत नवकं अक्षरादि रामा
प्रमाणोक्तं प्राप्याहं तदनुः स्थितः। योऽहमद्वयनश्च सर्वमद्वयेदवनिश्चयः। प्राप्यवानंदमात्मानं सोऽहमद्वयविग्रहः। ना

स्त्रिब्रह्मसदानंदमितितिमेदुर्म्मतिः स्थिता। क्वगतासानजा नामियदाहंतद्रूपः स्थितः। सर्वानंदाद्वये तत्त्वे मेवादिर्जगदा
कृतिः। बोधे बोधकृते वाहीद्बोधः क्वगतोऽधुना। संसाररोगसंग्रस्तो दुःखराशिरिवापरः। आत्मबोधसमुन्मेषादानंदाद्धि
कथं स्थितः। योहमल्पेपि विषयेरागवानतिविह्वलः। आनंदात्मनि संप्राप्तेसरागः क्वगतोऽधुना। यस्य मेजगतां कर्तुः
कार्यैरपहृतात्मनः। आविर्भूतपरानंद आत्मा प्राप्तः श्रुतेर्वलात्। परामृष्टोसि लब्धोसि प्रोषितोसि चिरंसदा। इदानीं त्वा
मर्हंसोसो न त्यजामि कदाचन। त्वां विना निःस्वरूपोहं मां विना त्वं कथं स्थितः। दिष्ट्येदानीं मया लब्धो यो सि सोसि नमो
स्तुते। देहाहंमाननिगडैर्बद्धो बोधाप्यास्तस्करैः। चिरं ते दर्शनाद्देव त्रुटितं वंधनं क्षणात्। विमुक्तोस्मि विमुक्तोस्मि सुपर्णे
तरूपर्णेन माकृतिः। असंस्पृश्य मम आत्मानमनंतब्रह्मांडकोटयः। तत्त्वमादिक्वयोजालमात्रत्वमम कृतस्मरा। इदानीं तत्त्वम
वादेव पूर्णानंदोव्यवस्थितः। न तु परिपूर्णानंदस्वरूपात्मन्वोहमात्मा कथं संसारावस्थायां न परिस्फुरति न च परमप्रेमास्पद त
यात्मनः स्फूर्तिरिवानंदस्वरूपस्य स्फूर्त्तिरिति वाच्यं तादृगभिमानाभावात् नेहिसो ज्ञावस्थायां प्राकृतानंदरूपत्वमात्मनः

सि॰द्ध॰ रूपत्वेनैतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीत्यादिश्रुतेः तादृशानंदात्माभिमानः कस्यापि दप्यस्ति।
आनंदं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमिति मोक्षएव तदभिव्यक्तिश्रवणात् संसारावस्थायां प्रतिबंधसत्वात् तस्मान
मायानंदस्वरूपत्वं नाभिमन्यत इति चेत् केनार्दि प्रतिबंधः अज्ञानं तत्कार्यं वा आद्ये जीवस्य परस्य वा नांत्यः तस्य सर्वज्ञ
३५ स्यानिरविद्यस्य तदभावात् नाद्यस्तस्य परेणाभेदात् तेनान्योन्याश्रितादृष्टेत्यादिश्रुतेन जीवेनात्मना तत्त्वमसीत्युपमानात्
लोक्यादिश्रुतिभ्यः न च कल्पनामात्रेणैव जीवस्याप्यज्ञानं न तु वस्तुतोस्तीति वाच्यं परस्मिन्नपि प्रसंगात् तेन वचिन्मात्र
निष्ठमज्ञानं तत्सर्वात्मना प्रतिबंधात्मेवेति वाच्यं यदि संसारावस्थायामप्रतिबद्ध आनंदो नास्त्येव कस्यापि प्राप्तावर्हिविध
निवृत्तिः स्यात् न हि संसारिणां स्वानंदसंसारनिवृत्तिः संभवति नित्यप्रतिबद्धत्वात् आनंदः संसारावस्थायामप्यस्त्येव केवलमस्य ३५
नस्य मुख्यत्वेनैतावान् भाति शब्दादिविषयविशिष्टविषमस्य तद्दर्शनातिलालसमानमनस्य तद्दर्शनवेलायामप्यस्ति तमा राम
वनास्य मुख्यापित विषयवद्विशाल कष्टहृदयस्य परमप्रियतमसंगादीक्षस्ववैप्रोतत्त्वमातिसन्निहितमप्यात्मानमीक्षि

सिद्ध विरुद्धत्वात्तद्दृष्टत्वानुपपत्तेः नच सर्वज्ञस्याप्यन्या विद्याऽदृष्टत्वेन विरोधः श्रुतिश्चाविद्यायास्तदृष्टत्वेन परमात्मनोध्यासं तत्त्वप्रपंचा
तनान्योतोस्ति द्रष्टेति शास्त्रविरोधाच्चेन न च सर्वज्ञत्वं नाम स्वरूपचैतन्येन स्वाध्यासकलनासकत्वं तच्चाविद्यावच्छेदेपि न वि
रुद्धात् इति वाच्यं निरवद्यं निरंजनमिति श्रुत्याविद्याया अपि तत्र निषिद्धत्वात् न च वक्ष्यमाणेताविद्यानिषेधस्स न तु कल्पिता
३६ याश्च पीति वाच्यं साधारण्यानिषेधात् वक्ष्यमाणताविद्याः प्रसिद्धेश्च जीवस्य वा विद्यान्तरभावितया नादित्वात्तु उपपत्तेश्चान्यथा
विद्यानिरूपणापि जीवभावो न निर्वहेत् तं न द्वितीयः जीवपरमात्मव्यतिरिक्तस्य प्रसक्त्येव तद्दृष्टत्वेनादृष्टत्वानुपपत्तेः नवा तत्प्राग्
गतमितरसामान्यस्यैव तद्दृष्टत्वमिति वाच्यं तथा च वक्ष्यमाणविद्याया अपि तत्त्वैव वक्ष्यमाणतया जीवत्व निरविद्यस्याध्यासस्य परमात्म
वत निरस्तत्वान्न च सर्वज्ञत्वाद्याघ्रापत्तिः उपाधिविशिष्टत्वरकालीन स्वाद्य तृतीयविभागस्याना विद्यानंगीकारे तद्विषयकप्रश्ना ३६
ज्ञेयानुपपत्या तस्यैव प्रष्टुरात्मे प्रष्टुर्वा विद्याऽदृष्टत्वमक्रममिति निषेधःप्रतं तस्यैव मम विद्याऽदृष्टत्वं स्वरूपस्येदानीं तथा तत्त्वनि रामः
र्णयार्थत्व क्रमव्याप्तं तेन च पश्चाक्तत्वा मस्वरूपमपि न जानासि अयमहमिदं स्वरूपं जानामीति तस्य तत्र प्रश्नश्च एव कथं स्यादिति वाच्यं प्रश्न

तुं लक्षणमलभमानस्य स्वग्रीवास्थग्रैवेयकाद्यनवधानवद्दशमानवधानमात्रं आत्मनि प्रतिबंधो न च वक्तव्यं अतिरिक्तोस्त्वीति बाढं
तद्दर्शनरूपस्य प्रतिबंधस्याश्रयनिश्चयासामर्थ्यात् तथा हि कोसौ द्वैतद्रष्टा किं परमात्मा किं वा जीवः किं वा परः कश्चि
त्. नाद्यः तस्य सर्वज्ञस्य भ्रमबीजाज्ञानाभावेन द्वैतदर्शनानुपपत्तेः अन्यस्याज्ञानं भ्रमश्च स्यात्रांतः सम्यक् [illegible] निरस्तत्वान्या
याद्ज्ञानमिथ्याज्ञानसम्यग्ज्ञानानां समानाधिकरणत्वनिश्चयेनाविद्यावत एव तत्त्वसंभवात् [illegible] न तर्हि जीवस्या
२५ विद्यातो द्वैतद्रष्टृत्वं नो तस्य परेणाभेदस्याकथ्यत्वात् न वा भेदेपि बिंबप्रतिबिंबवद्भावरूपस्य सर्वज्ञत्वद्वैतद्रष्टृत्वयोः [illegible] पत्ति
रिति वाच्यं वैषम्यात् तत्र हि सर्वसिद्धदर्पणाद्युपाधौ प्रतिबिंबभावानंतरं प्रतीयमानयोर्मलिनत्वस्वच्छत्वयोः [illegible] योपप
त्तिर्युक्ता इह तु द्वैतद्रष्टृपकल्पितस्यैवोपाधितया तत्प्रवेशेन बिंबप्रतिबिंबभावकल्पनायां तत्र सर्वद्रष्टृत्वस्य
व्यापकाद्युपपत्तेः नवानादिसिद्धाज्ञानस्य निर्विकल्पकस्य [illegible] नादित्वात् तः सर्वमिति पर्यनुयोगानुपपत्तिरिति वाच्यं
अनादिसिद्धाज्ञानद्रष्टुरप्यनादिसिद्धस्यैव वक्तव्यत्वात् न वासौ वक्तुं शक्यः नेव साक्ष्येव तथा तस्य सर्व [illegible] विद्या

विषयाज्ञानेसत्येवप्रश्नोपपत्तेः अन्यथाप्रष्टव्यार्थज्ञानाज्ञाननविकल्पेनप्रश्नाभावेनापृष्टस्यकस्यचिद्वक्तृयादितिन्यायेनस्व
यंवक्तुमशक्यत्वात्तयामहर्षिशास्त्रमप्रमाणंस्यादितिस्यात्तन्नैवप्रश्नविषयापरिज्ञानेकथंतद्विषयशब्दरचना। नचसर्गमहत्वा शब्द२
शब्दरचनानामेतिप्रसिद्धेरितिवाच्यं श्रीमच्छब्दवत्सार्थकस्यापिशब्दस्यतत्स्वरूपज्ञानादेवरचनोपपत्तेः सर्वथैवस्वरूपज्ञान
स्यैवशब्दरचनाहेतुत्वात् संसर्गज्ञानस्यचशब्दरचनाहेतुत्वेनप्रसिद्ध्याभावात् प्रमाणत्वेऽप्रामाण्यप्रयोजकतया स्व
थासिद्धेः नचदेहादीनांबुद्धिपर्य्यन्तानामहंममेत्यालम्बनप्रत्ययालंबनीभूतानामितरासांनात्मत्वादात्मतयाप्रतीयमानानाम
ध्येःस्मातमभ्रान्तस्तदापोवानव स्वरूपमितिवाच्यं तेषामप्यज्ञानकार्य्याणांमहोगोपकरणातयाममप्रत्ययविषयाणां
लक्ष्यत्वामरादीतरभोगसाधनवत्स्वरूपसर्जनतयाप्रतीयमानानांप्रत्येकसमुदाययोः कार्य्यकारणविलक्षणात् हेयाद्य
पारेयस्थभावममप्रत्ययाविषयपरमात्मस्वरूपंनतस्यातिनिरिक्तसर्वावस्थाएकमर्वदा स्वपितिवाच्यात्मवस्तुस्वरूपचानुपपत्तेः न
वदेहादिबुद्धिपर्य्यन्तेभ्योपयत्स्वरूपंत्वयापरिशोधितंतदेवस्वरूपमितिशृंहाणोतिवाच्यं तस्याप्यज्ञानस्वाश्रयनवाज्ञानेष

सिद्धा° विषयत्वं तदुभयस्वरूपमात्रं प्रत्यक्षं चैतन्यं यत्र यद्यमिति वा व्यंतस्यापि जीवेश्वरतद्भिन्नत्वादिरूपेणानिर्णीतमशक्यत्वात
यासंदेहाक्रांत चायं न च किं नाम निर्णयेन वस्तुस्वरूपं तु निर्णीतमेवेति वाच्यं तत्राशेषविशेषेणातत्त्वतस्तु प्रतिपत्त
३७ स्यात्तत्त्वज्ञानं च सामान्यविशेषरूपेणविशेषतस्तु नैवानुपपत्तेरिति वाच्यं तस्यैव सामान्यविशेषरूपस्य तत्त्वज्ञानस्य वा
पत्तेः तत्त्वज्ञानव्यतिरिक्ततया निश्चिते स्वरूपे संदेह एवं नोपपद्यत इति वाच्यं अज्ञानस्याद्यापि निवृत्त्यभावाशंकितत्वाज्ञा ३८
१० नेविवेकदृष्ट्यातत्त्वविद्भिः स्वरूपनिर्णयेपि तेनैवाज्ञानेन विपर्यस्यते संदेहोपपत्तेः नन्वाध्यस्ताज्ञानस्वरूपेपि तेनैतद
धिष्ठानस्यात्मनो विवेकः शक्यएवाधिष्ठानभेदेनाध्यस्तस्य पृथक्स्वरूपाभावात्ततो यदि विवेकदृष्ट्याधिष्ठान
स्वरूपमात्मतत्त्वं निश्चितं तदा तत्राध्यस्तमज्ञानं तत्कार्यं वा ततो भेदेन तत्रनाशंकितव्यमर्थेवनि [illegible] वत ३७
त्राज्ञानविरहात् संदेहानुपपत्यापरंज्ञानुपपद्यतेरिवेति वा व्यं एतावतापि द्वैतदृष्टेरनुत्पादनात् [illegible] रामा।
द्वैतस्य द्वैतदृष्टेश्चानुपपद्यते मोक्षकाले पि तद्दर्शनप्रसंगात् नतु मोक्षस्य नित्यत्वेन सर्वदा सत्त्वात् सर्वदा [illegible] मोक्ष

कालएवविमुक्तश्चविमुच्यत इतिशास्त्रात्। अन्यथामोक्षस्यकादाचित्कत्वेऽनित्यत्वप्रसंगः। तथाचमोक्षकाले द्वैतदर्शनप्रसंगो
नानिष्टमिदानींतद्दर्शनादितिचेत्। न प्राग्वल्लौकिकानुभवविरोधात्। न हि द्वैतदर्शनकाले कश्चिन्मोक्षमनु[illegible]तीति स
र्वेलोकविद् इममर्थं श्रुतिरपिप्रतिपादयति। अन्यथाशिलाप्लवनादिवाक्यानामपिस्वार्थप्रामाण्यप्रसंगः। ततोनसर्व[illegible]लोका
न्तकालः सर्वलोकानुभवविरोधादिति चेत्तर्हियेसर्वेऽनुभवितारस्तएवद्वैतद्रष्टारस्तएवनिश्चितास्तथायावद्बाधीनानिश्च
येद्वैतद्रष्टारःकःप्रश्नः॥ किमतस्तदभ्यतोभवतिएतेषांयद्द्वैतदर्शनंनदेवसच्चिदानंदपरिपूर्णात्मस्वरूपमोक्षाकिर्त्तावप्रतिबंध
कमितिइष्टापत्तौअत्रनत्विति तेषांघटितंबंधःप्रमद्वैतादृष्टुःकुतोमोक्षो नादिर्भवतीतिचेत्। नदर्शितंकिंतेभ्योभिन्नःयेनद्वैताद्
ष्टत्वंभवेत्कःसंशयः नहितानानात्मचेनानुभवामितिपांशुखड्गखादिना समलेपानानातेऽप्रदोआश्चर्यंतानानेकविधा
रदेवनिर्मलस्यमनुष्यादिभेदाभिमानात्पश्यन्द्वैतंनपश्यामीतिवदतस्तएववः कथंअद्वैतंसंप्राप्तंनहिमुक्तो॥ सन्यासिन
सुत्रतुमुमुक्षोरिदमुचितंसत्यापाभिधानमितिनन्वतोभिन्नएवास्तंतथाचसमाप्तपाभिधानमापादयतस्त्वैवास्मापि

सिद्ध धामप्रार्थं तत्तीति वेत्तर्हि को ऽहं यथात्मत्वेन द्रष्टः । किं सद्वितीयो अद्वितीयो वा यथा यः तर्ह्यपप्रत्यपरो दोषः । यः स्वं
विद्वांसं तं वेदा … व्यार्थ्यं भावद्वा त्वरूपेणापर्यवसितं द्वैतधार्त्वानन्निक्तं सद्वितीयं संकल्पयन्ति । एकमेवाद्वितीयं नेह नानास्ति
३८ किंच नेति नेत्याद्यशास्त्रविरोधश्च अकृत्वर्नो द्वितीयपक्षे उक्तदोषविरहादिति चेत्स्त्वं तर्हि कृतोऽमा सद्वितीयमात्मत्वेन ज्ञातवा
नसि त्वद्वयवनाद्युदाहृतशास्त्राविरोधीति चेत् एवं तर्हि प्रबुद्धोऽसि नात्र परं प्रष्टव्यमस्ति न ह्यात्मनि विदिते तत्परमविदितं
स्यादिति यत् प्रष्टव्यं स्यात्तस्य नास्मेति वेन आत्मनो वा अरे दर्शनेन श्रुत्या मत्या विज्ञानेनेदं सर्वं विदितमिति श्रुत्युपात्त । आत्मद
र्शनेनेतरत्सर्वं दृष्टं भवतीत्युक्तत्वात् । न चेदमनुपपन्नं यदात्मदर्शनेन तत्सर्वं दृष्टं भवतीति । कुत इति चेत् न यादृशि किमि ३८
तरत्सर्वमात्मनो भिन्नमभिन्नं वा नाद्यः अन्यदर्शनेनान्यस्य दृष्टमशक्यत्वात् । न हि घटे दृष्टे पटो दृष्टो भवतीति । अकार्य
कुं अन्यथा तयोरभेदापत्तेः । न द्वितीयः आत्मानात्मनोर्विरोधात् परमार्थस्यात्मानात्मनोरेकरूपत्वेनेत्यादिनाभिषेधितुमशक्य रामः ।
त्वात्तयालाबाद्धपपत्तेश्च अन्यथा आत्मनोऽपि बाधितत्वापत्तेः स्यादेवावशिष्यते तस्मादात्मदर्शने न सर्वं दृष्टं भवतीत्यु

पपन्नं नैष दोषः। आत्मस्वैव द्वैते तस्य भ्रान्तानाम्पायत्वात्। आत्मन्येतत्क्रमात्सर्वं दृष्टे दृष्टं श्रुते श्रुतं। आत्मसत्तातिरि
क्तायां द्वैतसत्ताया अभावादात्मनि दृष्टे सर्वं द्वैतं दृष्टं भवति यथा रज्जुस्वरूपे दृष्टे तत्राध्यस्तानां सर्पदण्डादीनां
स्वरूपं दृष्टं भवति तद्वत्। तस्मात् आत्मनि दृष्टे सर्वं दृष्टं भवतीति नानुपपन्नं। अत एव विधिनिषेधशास्त्रयोरपि नानुपप
त्तिः। यथा इदं सर्वं यदयमात्मा। सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं। ऐतदात्म्यमिदं सर्वं ब्रह्म वा इदमग्र आसी
त्। अहं मनुरभवं सूर्यश्चेति। यच्च किंचित् सर्वं आत्मैवाभूत्। नारायण एवेदं सर्वं यद्भूतं यच्च भव्यं इत्यादि विधिशास्त्रं।
तथा निषेधशास्त्रमपि नेह नानास्ति किंचन। अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत् परमस्ति। अतोन्य
दार्त्तं नतु द्वितीयमस्ति नैव द्वैतं किंचन। नासीत् नासदासीन्नो सदासीत् इत्यादि। भवति हि लोके रज्जौ सगाय भा
सिनं प्रत्युपदेश इदं सर्वं रज्जुरिति नेह सर्पादिरस्तीति। तथा भ्रान्तं प्रत्युपदेशयोर्मध्ये कतरः श्रेयानिति वेत् स
घप्रभयोरेकार्थत्वमेव तथापि विधिश्लेषणिकश्चिदतिशयः। तत्र हि परिदृश्यमानानां यासत्तासाक्षात्मैवेत्युक्ते

सिद्ध तदन्यत्वात्स्वात्मैवपरिह र्यइतिसाक्षाद्वेदाविर्नेयतिनिनिषेधैर्थान्निषेधाधिष्ठानतया। कथंतर्ह्यात्मप्रवृत्तं
विधिनैवप्रवृत्तप्रार्थस्थापर्य्यवसितत्वादितिचेत्न।अधिकारिभेदेनोभयोरुपयोगात्।कश्चिदधिकारीसंसारदुःखेनात्मतत्वंतमु
पहतचेतास्तञ्जिज्ञासुमेवप्रथमतःकामयतेतंप्रत्यादौनिषेधवाक्यमेवोपयुक्तंविधिवाक्यंतुपश्चात्तस्यात्मप्राप्त्या
३९ रोप्यमिथ्याकंपमानंप्रतिनायंसर्प्पइतिनिषेधएवादौनतुविधिः।अयंतत्रत्वद्धियः किमस्यजगतस्तत्वमित्यपेक्षि
तमतेतंप्रतिइदंसर्वंयदयमात्मेत्येवोत्तरंन्याय्यंनिषेधस्तुपश्चात्।यथासर्प्पमध्यस्यतत्प्रतीकारज्ञानान्निर्भयःप्र
ष्टतिकिमिदंपुरोवर्त्तीतितंप्रतिरज्जुरित्येवोत्तरंनतुनिषेधः।तस्मादवस्थाभेदेनोभयोरुपयोगान्नकस्यापिवै
यर्थ्यमतोविधिनिषेधाभ्यांपरिशिष्टःसच्चिदानंदःप्रत्यगात्मेतिसिद्धं।ननुतथापिकोऽसौद्वैतद्रष्टात्मविनिश्चि ३९
श्चितइतिचेत्।यश्चायंपृच्छसिकोहमितिचेतनोऽस्त्येव।एवंतर्हिब्रह्मणोविकारित्वापत्तिरितिचेत्न।अविकारत्वेन
तद्दृष्टिविनाशःद्वैतस्यकल्पितत्वात्कस्यापिनिषिद्धत्वात्।नहियत्राध्यस्तंतत्कस्यापितत्परिणामः।यथाऽनस्त्वंगतत्वेः राम।

स्यावैलक्षण्यं दृष्टिरेवेति चेत् तर्हि ग्राह्यग्राहकविवेके दृष्टिरेव परिणामोऽस्तु तदतिरिक्तद्रष्टा भावात् अर्थमिति
चेत् न दृष्टेः फलरूपायाः आत्मस्वरूपातिरेकाभावेन तत्परिणामत्वानुपपत्तेः न हि स्वयं स्वस्य परिणामः कार्त्स्न्यैकदे
२७ शविकल्पेन परिणामपक्षानुपपत्तेश्च न तु विवर्त्तपक्षेऽप्ययं दोषः समान इति चेत् न विवर्त्तस्वरूपापरिज्ञानात्
न त्वधिष्ठानस्वरूपातिरिक्तो विवर्त्तो नाम किंचिद्वस्त्वस्ति यदाश्रितपक्षकार्त्स्न्यैकदेशविकल्पावतारः स्यात् किं
त्वधिष्ठानमेव दोषवशाद्विलक्षणाकारेणावभासमानं विवर्त्त इत्युच्यते स एव विलक्षणाकारः कल्प्य इति चेत् वस्तु
तो न कस्यापि अधिष्ठाने तस्य बाधात् अन्यत्राप्रतीतेः अन्यथान्तरेणासत्ख्यातिमुत्पादनमेवैतदिति चेत् न ख्याते
रप्यपलापात् असत्ख्यातिवादिना चार्वाकेण तथानभ्युपगमात् सर्वशून्यवादित्वमुपपूर्वं निरस्तत्वाच्च किं
मिदं ख्यातेरधिष्ठानत्वमिति चेत् वस्तुतो निष्प्रकारिकायाः सप्रकारकत्वेन ज्ञानमेवेति दृष्टहानात् तस्यैव सप्रकारकस्य स्व
रूपं कल्प्यमिति चेत् वस्तुतो निर्विकल्पकख्यातिस्वरूपमेव तथैव तर्हि कल्पितव्यमिति चेत् उचितमेतद्धि तस्य न तु

सिद्धा श्रोतस्यतस्य भ्रांतत्वादेव किं तेनाधिकं प्रतीतमिति चेत् । न किमपि । कथमसौ भ्रान्त इति चेत् । अन्यप्रतीते र
न्यविषयत्वाभिमानादेव यथा लोके रज्जुभ्रमेतिसर्प्पं प्रतिमन्यते । धंसर्प इति । कोसावभिमान इति चेत् नु परमार्थक्षित
४० विषयस्य भासमानस्याप्यसत्वनिश्चयः । यदि वस्तुतो रज्जुप्रत्यय एव कथं तर्हि सर्प्पोल्लेखित्वात् प्रत्ययस्य रिक्त
रतीति चेत् । आकारसाम्यात् दोषवशात् चेति ब्रूमः । अत एव बाधोत्तरमन्यते रज्जुरे वमया प्रतिपन्नेति । तत्रापि किंप्र
र्योन प्रतिपन्न एवं कः संशयः । एवं तर्हि भवदभिरोध इति चेन्न प्रांतानुभवविरोधस्याविरोधात् । तस्य किं प्रतीतं कि
न प्रतीतमिति विवेकविरहात् । अर्थान्तरस्य तत्त्वस्य भावाभावेनानुभवविरोधाभावात् । न चैवं सति अधिष्ठानं तत्प्रती ४०
तिश्चेति द्वयमेव दृष्टान्ते अतिरिक्तप्रतीतिप्रसक्तत्वाद्ययेः रमव्यस्यानुत्पादनानूद्रष्टीतिके उक्ताधिष्ठानमात्मा तत्प्रतीति
श्च द्वयमप्यात्मैकस्वयंप्रकाशप्रतीत्यन्तरानपेक्षमात्रस्तथा च न तदतिरिक्तस्य विवर्त्तस्य दर्शयितुमशक्यतया म रामः
तं विवर्त्तवादेन ततोः तिरस्कृतः स्वसिद्धान्तपरित्याग इति चेन्न तस्य बालव्युत्पत्तिमात्रप्रयोजनतया उपनिषत्तात्पर्या

विषयत्वात् अन्यथा विपरीतदृष्टेरेवाद्वैतापत्तेः मिथ्यैवसा दृष्टिरिति चेत । किमिदं मिथ्यात्वं त्रैकालिकासत्त्वं वा
सत्त्वाविशेषेपि कदाचित्प्रतीयमानत्वं वा नाद्यः इष्टापत्तेः न द्वितीयः तत्प्रतीत्यैवाद्वैतद् तेस्मादवस्थात्वासासे
तत्प्रतीतिरिति चेन्न तस्यासत्त्वात् असंगो ह्ययं पुरुष इति श्रुतेः साक्षिणः कदाचित्कत्वानुपपत्तेः किंवात्म
नोद्वैतदृष्टिः प्रमाणसिद्धा भ्रांतिसिद्धा वा नाद्यः अद्वैतागमविरोधात् नेतरः भ्रांतिसिद्धपदार्थस्य सत्त्वनियमा
त् अन्यथा भ्रांतित्वानुपपत्तेः तथा चात्मनो द्वैतदृष्टिः कदाचिदपि नास्त्येव तया वस्तुतः यद्वैतन्न पश्यति पश्ये
तद्द्रष्टव्यं न पश्यतीत्यादिश्रुत्यात्मनो विलुप्तदृष्टिस्वभावस्याद्वैतदृष्टिं वारयति बालादिप्रति विवर्त्तोयं यद्ब्रह्मण
सकलं जगत । अविवर्त्तितमानंदं आस्थिताः कृतिनः सदेति स्मृतिरपि आत्मनो द्वैतदर्शनाभावमनुमन्यते न चात्म
नो द्वैतदर्शनाभावे नित्यमुक्तस्यासंसारिणः शास्त्रसाध्यप्रयोजनस्यानुपपत्तया शास्त्रानर्थक्यप्रसंग इति चेन्न नित्यमु
क्तस्यैवासंसारिणो तत्त्वासत्संसारनिवर्त्तकत्वेन शास्त्रप्रामाण्योपपत्तेः । अर्पितस्यतो नित्यनिवृत्ततया तत्शास्त्र

सिद्ध व्याघातेनानर्थक इति चेन्न । स्वल्पापि तुल्यत्वात् । न हि स्वप्नविवर्त्यप्रतिशास्त्रमिति क्वचिद्दृष्टं । अनिर्वचनीयं निवर्त्यं शा
स्त्रमिति चेन्न तत्राप्यदर्शनस्य तुल्यत्वात् । न च अनिर्वचनीयं निवर्त्तेत इष्टस्य प्रतिपत्तेः फलमस्ति । तस्माद्विशुद्ध
स्य विशुद्धस्य तेन निवर्त्तनं वा निवर्त्तेत इत्यादिशास्त्रादत्यंतासत्संसारनिवर्त्तकत्वेनैव शास्त्रप्रामाण्यं । निष्प्रपंचोऽप
४१ रिपीडितं जगद्धि भ्रमं तुदति वाक्यजा मतिः । वासुदेवनिहतं धनंजयो हंति कौरवकुलं यथाद्भुतः इति स्मृतेर
पि जगदात्मकस्य विभ्रमस्य नित्यबोधस्वभावस्यात्मनः स्वरूपपर्यालोचनायां तामसत्वमेवाह किं च ब्रह्मातिरिक्तशा
स्त्रस्य सत्यमस्तीति ये मन्यंते तेषां स्वप्रतिज्ञव तथा शास्त्रप्रामाण्यप्रसंगो दोषः तस्य प्रमाणैकस्थमात्रवचा इत्येतन्म ४१
तिसद्द्वैतमेवास्ति द्वैतवादिनां निजिज्ञासा इत्यनिकथ्यमप्रयं दोषः स्यात्तैः शास्त्रस्य वा तत्प्रामाण्यस्य वा ब्रह्माति
रिक्तस्यानभ्युपगमात् अन्यथा तान्याभेवाद्वैतज्ञतिः स्यात् न वेदप्रामाण्यानभ्युपगमेषां पांडवप्रसंगः तदप्रा राम
माण्यस्याप्यनभ्युपगमात् न च वेदप्रामाण्यानभ्युपगमे द्वैतस्याप्रामाणिकत्वप्रसंगो दोषः द्वैतदर्शिनं प्रति प्र

माणाधीनसिद्धिकत्वे तस्य दोषत्वात्। न च द्वैतादर्शित्वं किमात्मनो धर्मः स्वभावो वा नाद्यः द्वैतापत्तेः नेतरः द्वैतज्ञानतस्य
सर्वस्य स्वतः सिद्धिप्रसंगादिति विवेकश्रुतिदृष्टान्तस्य स्वरूपानुरोधेन द्वैत ज्ञानस्य सर्वस्य तुच्छत्वाच्चात् न हि तुच्छस्य स्वतः सिद्धिः
संभवति तस्य निरस्तसमस्तसामर्थ्यस्य स्वतः परतो वा सेतुमथ कन्याचात्रोन चात्मापि तस्य तुच्छतां तद्दर्शनस्य च तुच्छत्वं
लौकिकानामपि मतं परीक्षकाणां वा नाद्यः तेषामबाधितचक्षुर्द्वैतज्ञानाव्याहतत्वात् तुच्छत्वस्य द्वैतनिरस्तत्वात् नेतरः
परीक्षकाणां सर्वेषामेकमत्याभावात् सर्वशून्यवादिना निःशेषप्रमाणप्रमेयापलापिना प्रामाणिकेनाशेषस्य तुच्छ
त्वस्वीकारात् तद्विरुद्धस्य नित्यानित्यविज्ञानेन सार्वविदिकैर्वा दाविनुकस्य तस्यासीद्वरपाक्कणाभुगादिभिः स्वीकारात् त
द्विरुद्धस्य च सर्वदा सर्वेषां च स्यात् सांख्यादिभिरभ्युपगमात्। तस्मात् परीक्षकाणामपि सर्वेषां परस्परं विप्रतिपत्तेरला
तिरिक्तस्य सर्वस्य तुच्छत्वस्य संप्रतिपन्नमेव न तथा लौकिकपरीक्षकविरुद्धं जगत्तुच्छत्वं कथमं गीकारयथमध्यारोपहृ
नव परीक्षकाणामपि प्रत्येकं परस्परविरुद्धतया लौकिकपरीक्षकविरुद्धत्वे वेति वा व्यंतावतापीके कांक्षीकारस्य तत्रत्या

सिद्धा ग्राहकत्वात् । उक्तं चैतदस्माभिस्तात्पर्येनवाचापि ममांसकि रोऽस्त्वेवेति वाच्यं । तथा प्रामाणिकत्वात् । उक्तं च ग्राहकप्रमाणान्त-
रात्तत्परीक्षकाणामपि परस्परविरुद्धानां मध्ये कस्य मतं समीचीनं कस्य वा समीचीनमिति विनिगमकाभावादे-
५१ कमपि न प्रामाणिकमिति वाच्यं । नित्यनिर्दुष्टवेदमूलकत्वेनावाधकत्वादिश्वे पातञ्जलप्रभृतिमतं वेदमूलं तद्बाह्यं स्वत-
न्त्राश्रितत्वादप्रयथापाखण्डानां मतं । हन्त तर्ह्येतेषामपि मध्ये कस्यैव विश्वासस्तेन श्रुतिसिद्धमेव मतमदुष्टत्वात्तदित- ५३
रतुल्यमेवाप्रामाणिकत्वात् श्रुतिविरुद्धत्वाच्च । श्रुतिस्तु सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं नेह नानास्ति
किंचन स एष नेति नेति । अथ तस्याः प्रमादेशो मात्रश्चतुर्थः । अव्यवहार्यः प्रपंचोपशमः शिवोऽद्वैत इत्येवंप्रकारिका सजाती-
यविजातीयस्वगतभेदरहितं प्रतिपाद्यस्वरूपमात्मानं बोधयन्ती आत्मातिरिक्तस्य सर्वस्य तुच्छत्वं मिथ्यात्वं तेन तदतिरिक्तस्य कथं- ५१
चिदपि सत्त्वे द्वैतस्याबाधात् प्रसंगात् । तस्मादज्ञानात् तत्कार्यं च तुच्छमतमेवेति तदुक्तं गौडैः । उक्तं । निर्वचनीया च या वाच्या वेदैः १०
त्रिधा ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः । वासिष्ठोऽपि समेवार्थमाश्रित्य वदाह । अहो तु विचित्रं यत् सत्यं राम ।

ञ्जनतद्विस्मृतं चरणं॥ यदस्यामविद्यायाम्यंत तत्पुरः परिकल्पितं तथा॥ अहो तु चित्रं परमो द्वैतं वेद्यास्तं च निरुद्ध्यः॥ अवि
द्यमानाया विद्यातया विश्वं विलीकृतं। तस्माद्द्वैतनदर्शनयोर्युद्धत्वात्तस्मात् शुद्धद्वृत्तकृद्धभावपरिक्षणं। नस्यात्मनो
दृष्टद्वद्धमुपपन्नतरं॥ तथा च श्रुतिः॥ न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः॥ न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥
तदेव निष्कलं ब्रह्म निर्विकल्पं निरंजनं॥ तद्ब्रह्माहमिति ज्ञात्वा ब्रह्म संपद्यते ध्रुवं॥ निर्विकल्पमनंतं च हेतुदृष्टांतवर्जि
तं॥ अप्रमेयमनादिं च यज्ज्ञात्वा मुच्यते बुधः॥ इत्येवमादिकात्मनोऽद्वैतदर्शनश्रुत्यर्थमेवाहा तस्मात् सत्यं ज्ञानमन
तं ब्रह्म पूर्णानंदविग्रहं॥ मां च वर्णाश्रमात्मानं विनिश्चित्य विमुच्यते॥ न वैतादृश्यात्मज्ञानं न जायत एवेति वांप्रतेमा धनकष्ट
यसंपन्नस्य विविदिषोर्मननिदिध्यासनाभ्यासपूर्वकतत् श्रवणात्तु ध्यानसमनंतरमेव तदुत्पत्तिदर्शनात्। अन्यथा तादृशात्म
प्रतिपादिकागमाप्रामाण्यप्रसंगः॥ न च जातमपि ज्ञानं साधनांतरापेक्षया फलदानाय विलंबत इति वाच्यं तद्द्वैततत्पश्यद
र्षिर्वामदेवः प्रतिपेदे ब्रह्म वेद ब्रह्मैव भवति तरति शोकमात्मविदित्यादिश्रुतौ आत्मज्ञानतत्फलयोः समानकालत्वनिर्देशा॥

सिद्धा तूमध्येसाधनान्तरकालविलंबयोरभावप्रतिपत्तेः। तमेव विदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेऽयनायेतिसाध
नांतरप्रतिषेधश्रवणात्‌ वत्तस्मात्‌तत्संन्यासात्मज्ञात्तमेवामृतत्वसाधनंयत्नतःसंपादनीयंतदभावेयतोमहतीविनष्टिः।
श्रूयतेइहचेदवेदीर्महतीविनष्टिस्तत्र।उत्पन्नेवब्रह्मात्मविज्ञानेविदुषःफलेनसहविद्योऽकारःसमर्प्यते।विद्याविद्यस्मय
४२ हेणापिद्विलंफलंवस्तुद्वैप्रराज्ञकृष्णोत्तममतमस्तुनिधिपाप्तुंजाद्विषीकामिनी।कोशातकारणमाप्प्यंरूपविलासतपसा
मिनिःसंशयंकाशीदृष्टिनविष्यतिकाजगतःसंसारदुःखोदधिः।परमात्मानिविश्वमिवसर्वमिदंद्वितीयंतिष्ठामिनिष्कल
चिदेकवपुष्यनंतो।आत्मानमद्वयमनंतमुच्छ्वेकरूपंपरपामिदम्बरशनामिवप्रपंचो।अद्वैतमप्यनुभवापिकस्य
चित्वकल्पंशरीरमाहिनीनिर्वचनीयवदीतो।एवंबजीवनमिवप्रतिभासनंवनिःश्रेयसाधिगमनंवसमसमसिद्धं।आश्चर्यमद्य ४२
ममभातिकथंद्वितीयंनिस्त्रैनिरस्यनिखिलाशिवबितप्रकाशे।आसीदुरेतिकिमिमाःश्रुतयोनसर्वंयेनद्वितीयम
नवत्रिभिरप्रहृतो।एवंश्रीआचार्यप्रसादादपरोक्षीकृतब्रह्मा।मतचस्पक्षभक्तानिनयापिस्मर्यंते।तोपीयंवि रामः।

धालायतएवतथाहियस्मादर्पकेजसमाश्रयणंविनामेसन्न्राप्यसात्रिवमरःपुत्रघःपुरासीतांयस्मादपश्च्यपु
मलाश्रयणादिदानीमासीन्नवाक्षिन प्रविघ्नतिनेस्तुद्धिः।यस्मात्स्वरूपापरवशोममहद्भिःकिंस्वेमारो
गामपनेतुमभिप्रवृत्तः।तस्माद्वर्षक नरकं:शिरसादधानस्तामाशरीर पतनादहमप्युपाये न त्वविर्येषुघे अविधे
यमर्दैपि कथंसंसारस्येहलोकपरलोकसंवारलक्षणस्यनानाविघयोनिप्राप्तिपरिहाराभ्यामनेकविघदुःख
संकुलस्यनिवृत्तिःस्यात्तद्धेतोःकाम्यकर्म्मादेस्तद्वस्तुत्वात्।नवाविघानिवृत्त्यातदुपादेयस्यापिसर्वस्यनिवृ
त्तिरावश्यकीतिवाच्यं।वैशेषिकाणांउपादानेनिवृत्तेपिगुणकार्य्यावस्थानवदनिवृत्तिर्थकायादुरयकूपत्वा
तूनवद्गुणांतरेनेस्थत्येवेतिनदोषः।ततगुणवत्तदुत्तरगुणेप्यनुपपत्त्यभावस्यापितुमातुंशक्यत्वात्तस्मादहमात्मेति
वृत्तेपिसंसारोननिवर्तिष्यतेप्रमाणानांवादितिव्यर्थःप्रयासःमैवं।कर्म्ममूलमनर्थानांतद्वयदानेनवाध्यते।
क्षीयंतेवास्यकर्म्माणितथावश्रुतिशासनात्।ज्ञानेजातेपिकर्म्ममूलकःसंसारोऽनुवर्तिष्यतइतियदुक्तंतत्राह

सिद्धा विद्यावतः कर्म्मणोपि ज्ञानेन बाधितत्वात्। तत्र अविद्यावत्कार्य्येणापि विद्याया विरोधित्वाविशेषात्। न हि सम
वन्निरज्जुसर्पाज्ञानकारेण तदविद्यानिवृत्तौ तत्कार्य्यसर्प्पाद्यनुवर्त्तते इति। न च यतो ज्ञानस्यैव ज्ञानं निवर्त्तकमि
त्यवधारणं शास्त्रकाराणामेवं सम्प्रसमंजसमिति वाच्यं। अज्ञानकार्य्यस्याप्यज्ञानाव्यतिरेकात्। तदभावे तत्सद्यात्तु
४४ पलंभात्। न वात्र प्रमाणाभावः। भिद्यते हृदयग्रंथिः छिद्यंते सर्व्वसंशयाः। क्षीयंते चास्य कर्म्माणि तस्मिन्दृष्टे
परावरे इति श्रुतेः। न चैतद्वाक्यं कं... कर्म्म निरर्थकपरमेवेति वाच्यं कर्म्मशब्दस्य संकोचे प्रमाणाभावात् विद्यास
मर्थ्यस्य बोधयत्वस्याश्च ब्रह्मणः कवचित्तानंश्चायदेशिकस्य र्वेक। बुद्धिपूर्वकृतं तेषां यं कश्चिद्ददाति ब्रह्मविद्वि
त्यत्र बुद्धिपूर्वकृतमपि यस्य। पिशस्त्रना नेनदाहस्मरणात्। यथैधांसि समिद्धोग्निर्भस्मसात्कुरुतेर्जुन। ज्ञानाग्निः ४४
सर्वकर्म्माणि भस्मसात्कुरुते तथा इत्यत्र सर्वशब्देनाशेषं बुद्धिपूर्वकृतं पापं गृहीत्वा तस्य सर्व्वस्य ज्ञानाग्निना दाहस्य भगवता रामः।
प्युक्तत्वात्। न किंच यस्य दर्शनमात्रादन्येषामपि पापक्षयो जायते का कथा तस्य ब्रह्मीभूतस्य पापक्षये। तदाह ...
ना २

सिं६५

सिद्धा रवशिष्टः॥ यस्याभवपर्य्यंतंतत्वेबुद्धिःप्रवर्त्ततेतद्दृष्टोपिवरःसर्वैर्मुच्यंतेसर्वपातकैः॥ तथाकल्पा॥ विश्वस्येदेवत्वम
पिब्रह्मविदःसमर्प्पितं॥ कुलंपवित्रंजननीकृतार्था विश्वंभरापुण्यवतीचतेन॥ अपारसंवित्सुखसागरेस्मिन्लीनंप
४५ रेब्रह्मणियस्यचेतः॥ तस्माद्यथोक्तब्रह्मात्मैकत्वविज्ञानेनकृतकृत्योभवती तिनात्रविवदितव्यमिति॥ ॥गुणिनोगु
णिनायततामुपेत्य॥ शुद्धये ... तापकाशयतिना सिद्धांतमुक्तावली॥ अद्वैतानंदसंदोहसत्पदानादिलक्षणा॥ना
रायणसमासक्ताश्रियेसापत्य ... चेता॥ स्फुरणप्रकाशरचितामद्वैततिमिरापहा॥ वादीभकुंभनिर्भेदेदंष्ट्राधरीस्फु
तावेदांतसारसर्वस्वमहोयमनुभ ... नैः॥ अशेषेणामयोक्तंतत्सुप्रबोध्यमप्ययत्नतः॥ ॥स्नातंतेनसमस्ततीर्थसलिलेःसर्वा
पिदत्तावनिर्यज्ञानांचकृतंसहस्रमखिलादेवाश्चसंपूजिताः॥ संसाराच्चसमुद्धृताःस्वपितरस्त्रैलोक्यपूज्योप्यसौ॥ यस्य
ब्रह्मविचारणे ... क्षणमपिस्थैर्य्यंमनःकृष्ण॥ ॥इतिश्रीपरमहंसपरिव्राजकाचार्य्यश्रीज्ञानानंदपूज्यपादशिष्यश्रीप्रकाशानं ४५
दविरचितासिद्धांतमुक्तावलीसमाप्ता॥ ॥शुभमस्तु॥ ॥संवत्॥ १८९५॥ समयेकार्त्तिकाशुदि ७ मंगले॥ ॥ राम॥

पुयात् २ ... ६४५ ता॥ २